संजातं तारकादिभ्य इतच्'' पा॰ इतच् तारकित अस्य आकृतिगणत्वात् अन्येऽपि शब्दा यथाप्रयोगमत्रावसेयाः।

**तारकायण** पु॰ विश्वामित्रपुत्रभेदे "औदुम्बरा ह्यभिष्णाता-स्तारकायणचञ्चुलाः" हरिवं॰ २७ अ॰। विश्वामित्र-पुत्रकथने। [तयोऽप्यत्र।

**तारकारि** पु॰ ६त॰। कार्त्तिकेये हेमच॰। तारकशत्रुप्रभृ-

**तारकित** न॰ तारका संजाता अस्य तार॰ इतच्। नक्षत्रयुक्ते आकाशे "सितनिशादृषदि स्फुटनिष्पतत्कणग-णाधिकतारकिताम्बरः" नैष॰।

**तारकिणी** स्त्री तारकाः सन्त्यत्र इनि ङीप्। १नक्षत्रयुक्तायां रात्रौ राजनि॰ २तारकायुक्ते त्रि॰ स्त्रियां ङीप्।

**तारकोपनिषद्** स्त्री तारयति ज्ञानदानेन तारि-ण्वुल्। तारिका उपनिषत्। उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

**तारक्षिति** पु॰ तारा उच्चा क्षितिर्यत्र। देशभेदे स च देशः वृ॰ स॰ १४ अ॰ प्रतीच्यामुक्तः "अपरस्यां मणिमान्" इत्युपक्रमे "पञ्चनदमठपारावततारक्षितिशृङ्गवैश्यकन-कशकाः" कूर्म्म॰। २उच्चभूमौ स्त्री।

**तारण** पु॰तारयत्यनेन ल्युट्। १भेलके रत्ना॰। कर्त्तरि ल्यु। २तारयितरि त्रि॰ ३विष्णौ पु॰। "अशोकस्तारणस्तारः" विष्णुस॰। ४भावे ल्युट्। ५तारणकरणे ६उद्धारणे च न॰ "तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै" भा॰ व॰ १३अ॰। भावे युच्। तारणा ७तरणप्रापणे स्त्री "तारणा पारणं चैव तद्व्रतं सर्वकामिकम्" हरिवं॰१४॰ अ॰। षष्टिवर्षमध्ये अष्टादशे ८वर्षभेदे। "अति-वृष्टिश्च जायेत धान्यस्याथ प्रपीडनम्। शस्यं भवति सामान्यं तारणे सुरवन्दिते!" ज्यो॰ त॰। "तारणं तदनु भूरिवारिदं शस्यवृद्धिमुदितञ्च पार्थिवम्" वृ॰ स॰ ८अ॰

**तारणि(णी)** स्त्री तार्य्यतेऽनया तॄ-णिच्-अणि। १नौकायां ह्वारा॰ वा ङीप्। ङीबन्तः २काश्यपपत्नीभेदे याजोप-याजयोर्ब्रह्मर्षोर्मातरि तस्या अपत्यम् ढक्। तारणेय तदपत्ये। "तथैव च महाभागः सोऽपश्यच्छंसितव्रतौ। याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ। संहिता-ध्ययने युक्तौ गोत्रतश्चापि काश्यपौ। तारणेयौ युक्त-रूपौ ब्राह्मणावृषिसत्तमौ" भा॰ आ॰ १६७ अ॰।

**तारतण्डुल** पु॰तारः शुद्धमौक्तिकमिव शुभ्रस्तण्डुलोऽस्य। धवलयवनाले राजनि॰।

**तारतम्य** न॰ तरतमयोर्भावः ष्यञ्। १न्यूनाधिकत्वे "निर्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिमुक्तचेतसाम्। बोधनाय विधिना विनिर्म्मिता रेफ एव जयवैजयन्तिका" इत्युद्भटः। "अहो तारतम्यं नराणाम्" स्वच्छक॰ तरतमशब्दे उदा॰।

**तारतार** न॰ तारयतीति तारं तत्प्रकारः प्रकारे द्वित्वम्। सां॰ त॰ उक्ते गौणतृतीयसिद्धिभेदे तारशब्ददर्शिते "ऊहः शब्दोऽध्ययनम्" इत्यादिवाक्ये "ऊहस्तर्कः आगमावि-रोधिन्यायेनागमार्थपरीक्षणम् संशयपूर्वपक्षनिराकरणे-नोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिस्तारतारमुच्यते" त॰ कौ॰।

**तारटी** स्त्री तरट्येव स्वार्थे अण् ङीप्। तरटीवृक्षे राजनि॰ तारटीति पाठान्तरं तत्रार्थे। [राजनि॰।

**तारपुष्प** पु॰ तारं रजतमिव पुष्पमस्य। कुन्दवृक्षे।

**तारमाक्षिक** न॰ तारं रूप्यमिव माक्षिकम् उपधातुभेदः। रजततुल्ये उपधातुभेदे। "तारमाक्षिममन्यत्तु तद्भवे-द्रजतोपमम्। किञ्चिद्रजतसाहित्यात् तारमाक्षिकमी-रितम्। अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः। न केवलं रूप्यगुणावर्त्तन्ते तारमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः। स्यात् तारमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्। चाक्षुष्यं वस्तिरुक्कुष्ठ-पाण्डुमेहविषोदरम्। अर्शः शोथं क्षयं कण्डूं त्रि-दोषमपि नाशयेत्। मन्दानलत्वं बलहानिमुग्रां विष्ट-म्भितां नेत्रगदान् सकुष्ठान्। तथैव मालां व्रणपूर्विकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम्"। शोधनन्तु। "कर्कोटी मेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम्। भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम्। विमला तारमाक्षिकम्। मार-णन्तु "कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत्। तैलेन वाऽजमूत्रेण म्रियते तारमाक्षिकम्" भावप्र॰।

**तारल** पु॰ तरल एव अण्। १तरले २विटे च शब्दार्थचि॰।

**तारवायु** पु॰ कर्म्म॰। अत्युच्चशब्दयुक्ते पवने।

**तारविमला** स्त्री तारोरजतमिव विमला। तारमाक्षिके उपधातुभेदे शब्दार्थचि॰।

**तारशुद्धिकर** न॰ तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् जातमलशुद्धिङ्करोति कृ-ट। सीसके तत्सम्पर्काद्धि रजतस्य मलशुद्धिर्लोकसिद्धा राजनि॰।

**तारसार** पु॰ उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

**तारहार** पु॰ तारनिर्मितो हारः। १स्थूलमुक्ताहारे "संव-र्द्धितोरःस्थलतारहारः" रघुः।

**तारा** स्त्री तारयति संसारार्णवात् भक्तान् तॄ-णिच्-अच्। १दशमहाविद्यान्तर्गते द्वितीयमहाविद्याभेदे। २नक्षत्रे च